**ARYAVART SHODH VIKAS PATRIKA**
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218
**PP. No.- 132-135**
ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-16, No.- II, Issues-28, YEAR- April-June-2023

# द्वितीयाविभक्तिविमर्शः

**डॉ0 मनोज कुमार मिश्रः**
पूर्वशोधअध्येताः – व्याकरणविभागः, संपूर्णानंदसंस्कृतविश्व विद्यालयः वाराणस्याम् (उ0प्र0), भारत

Received-03.05.2023, Revised-08.05.2023, Accepted-11.05.2023 E-mail: manoj.k.09988@gmail.com

***सारांशः*** *'विभक्तिश्च'[1] सूत्रेण सुप्तिङन्तौ विभक्तिसंज्ञकौ भवतः। कारकप्रकरणे द्वितीयाविभक्तिः कस्मिन्नर्थे भवेदिति विमर्शः वृहद्रुपेण समुपलभ्यते। तद्सर्वमत्र पाणिनिसूत्रपूर्वकं निबन्धेऽस्मिन् यथा बुद्धि समीक्ष्यते। 'कर्मणिद्वितीया'[2] द्वारा कर्मणि– अर्थे द्वितीयाविभक्तिः भवतीति तत्र कर्मपदेन कस्य ग्रहणमिति विचारार्थं कर्मलक्षणं सुस्थिरं क्रियते।*

*भगवता पाणिनिना सर्वप्रथमं कर्म लक्षणं 'कर्तुरीप्सिततमं कर्म'[3] इत्येवं रूपं .तम्। लक्षणस्थितानां पदानां पदकृत्यञ्चेद् क्रियते तर्हि तत्तल्लक्षणानि दृष्टिपथमायान्ति। सूत्रात्तु–कर्त्राऽऽप्तुमिष्यमाणं कर्मेत्यायाति। आप्तिश्चात्र सम्बन्धो न तु व्याप्त्यर्थकः। स च सम्बन्धः उपस्थितत्वात् कर्तृपदार्थविशेषणीभूतव्यापारद्वारक एव गृह्यते। उपस्थितपरित्यागेऽनुपस्थितकल्पने मानाभावात्। एवञ्च कर्त्रा स्वनिष्ठव्यापारप्रयोज्यफलेन सम्बन्धुमिष्यमाणं कर्म इति। यथा– तण्डुलं पचतीत्यादौ[4] व्यपदेशिवद्भावेन फलस्यापि स्वसम्बन्धित्वात्कर्मत्वसिद्धिः। केचन अत्राक्षिपन्ति यत् कारकाधिकाराद्व्यापारलाभात्तेन कत्तुराक्षेपात् कर्तृवृत्तिव्यापारप्रयोज्यफलवत्त्व– प्रकारिकेच्छानिरूपितविषयताश्रयः कर्मेत्यर्थे देवदत्तः ग्रामं गच्छतीत्यादौ देवदत्तकर्तृवृत्तिव्यापार 'उत्तरदेशसंयोगानुकूलरूपः' तत्प्रयोज्यं फलमुत्तरदेशसंयोगरूपं तादृशफलवत्वप्रकारिकेच्छा मद्वृत्तिव्यापारप्रयोज्यफलाश्रयः ग्रामो भवत्वित्याकारिका तादृशेच्छानिरूपितविषयता ग्रामनिष्ठा तादृशविषयताश्रयस्य ग्रामस्य कर्मत्वे सिद्धे कर्त्तुर्ग्रहणं व्यर्थमिति चेन्न। तस्य प्रकृतधातूपात्तव्यापाराश्रयकर्त्तुर्ग्रहणेन सार्थक्यात्। अन्यथा माषेषु प्रसक्तमश्वं माषनाशो मा भूदित्यन्यत्र बध्नातीत्यर्थके माषेष्वश्वं बध्नातीतिप्रयोगे माषभक्षणकर्तुरश्वस्य मद्वृत्तिव्यापारप्रयोज्यगलविलाधः संयोगरूपफलाश्रयतया माषा भवन्त्वितीच्छायास्सत्त्वादधिकरणसंज्ञाम्बाधित्वा माषाणां कर्मत्वापत्तेः। प्रकृतधातूपात्तव्यापाराश्रयकर्त्तुर्ग्रहणे तु नोक्तदोषः, अश्वस्य प्र. तधातूपात्तव्यापाराश्रयत्वाभावेनाग्रहणात् उक्तञ्च भट्टोजिदीक्षितेन– 'कर्ता च धातूपात्त व्यापाराश्रयः'[5] इति।*

**कुंजीभूत शब्द– विभक्तिश्च, निबन्धेऽस्मिन्, कर्मणिद्वितीया, कर्मलक्षणं, कर्तुरीप्सिततमं कर्म, तण्डुलं पचतीत्यादौ व्यपदेशिवदावेन।**

न च मूललक्षणे– कर्तुरीप्सिततमं कर्म' इत्यस्य स्थाने 'कर्तुरुद्देश्यं कर्मे'ति लक्षणमस्तु इति वाच्यम् एतल्लक्षणकरणे 'देवदत्तः पयसा ओदनं भुङ्क्' इत्यत्र यदा कृतभोजनोऽपि देवदत्तः पुनः पयोलोभेनौदनभोजने प्रवर्त्तते तदा भोजनक्रियाकर्त्तुः पयस उद्देश्यत्वात् कर्मत्वापत्तेः। पूर्वोक्तलक्षणे ईप्सिततमपदग्रहणेन पयसः कर्तृवृत्तिव्यापारप्रयोज्यगलविलाधः संयोगरूपफलाश्रय–त्वाभावान्न पयसः कर्मत्वम्। न च पयसा ओदनम्भुङ्क्ते इत्यादौ पयसः कर्मत्वव्यावृत्यर्थमीप्सितग्रहणमेवास्तु, तमब् ग्रहणं व्यर्थमेवेति वाच्यम्। अग्नेर्माणवकं वारयतीत्यादावग्नेः कर्मत्वव्यावृत्यर्थत्वेन तस्य सार्थक्यात्। न चाग्नेः कर्मत्वे वारणार्थानामि'ति सूत्रं वैयर्थ्यमापद्यतेति वाच्यम्। तस्यसामर्थ्यात्कर्मसंज्ञाम्बाधित्वा माणवकस्यापादानसंज्ञाविधानेन साफल्यात्। न चाग्नौ 'वारणार्थानामि'त्यस्य चरितार्थत्वे कथमपवादत्वमिति वाच्यम्। माणवकस्यापि वारिधातूप स्थाप्यसंयोगरूपफलाश्रयत्वात् संयोगाद्यनुकूलव्यापाराभावानुकूलव्यापारस्यैव वारिधात्वर्थत्वात्। न च संयोगस्य वारिधात्वर्थकर्तृव्यापारजन्यत्वाभावात्सं योगाश्रयेऽग्नौ कर्मत्वाऽप्राप्त्या तत्र चरितार्थस्योक्तसूत्रस्य कथमपवादत्वमिति वाच्यम्। असति तमब्ग्रहणे कर्तृवृत्तिव्यापारवाचकधातू पात्तफलाश्रयत्वमित्यर्थस्यैव तेन लाभेन तत्र कर्मत्वस्य दुर्वारत्वात्। असति तमब्ग्रहणे कर्तृवृत्तिव्यापारवाचकधातूपात्तफलाश्रयस्य कर्मत्वमित्यर्थेऽग्नेर्देवदत्तकर्तृवृत्युत्तरदेशसंयोगानुकूलव्यापाराऽभावानुकूलव्यापारवाचकवारिधातूपात्तोत्तरदेशसंयोगाश्रयत्वेन कर्मत्वं दुर्वारं स्यात्। ईप्सिततमब्ग्रहणसत्त्वे तु प्रयोज्यत्वलाभः। ईप्सिततमत्वञ्च–प्रकृतधात्वर्थ– प्रधानीभूतव्यापारप्रयोज्य–प्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्। तथा च प्रकृतधात्वर्थप्रधानीभूतव्यापारः उत्तरदेश– संयोगानुकूलव्यापाराऽभावानुकूलव्यापारस्तत्प्रयोज्यं फलमुत्तरदेशसंयोगानुकूलव्यापारस्तदाश्रयत्वं माणवकस्येति तस्यैव कर्मत्वम्, अग्नेस्तादृशफलाश्रयत्वाभावान्न कर्मत्वमिति।

लक्षणे प्रयोज्यत्वनिवेशस्य फलं 'गां पयो दोग्धि देवदत्त इत्यादौ विभागानुकूलव्यापाराऽनुकूलव्यापारार्थक दुहियोगे पयसः कर्मत्वसिद्धिः। जन्यत्वनिवेशे तु न तस्य कर्मत्वं पयोनिष्ठविभागस्य प्रधानीभूतव्यापारप्रयोज्यत्वेऽपि उक्तव्यापाराऽजन्यत्वात्। प्रयोज्यत्वञ्च साक्षात्परम्परा साधारणमिति न तस्य कर्मत्वानुपपत्तिरिति भावः।

ननु 'कर्तुरीप्सिततमं'[6] 'तथायुक्तमि'[7] ति लक्षणद्वयाकरणरूपलाघवात् कर्तृनिष्ठव्यापारप्रयोज्यफलसम्बन्धाश्रयः कर्मेत्यर्थकं 'कर्तुराप्यतमं कर्मे'त्येवास्तु सूत्रम्। अग्नेर्माणवकं वारयति कूपादन्धं वारयतीत्यादौ नाग्निकूपयोः कर्मत्वापत्तिः, अग्निकूपनिष्ठफलसम्बन्धस्य कर्तृव्यापारप्रयोज्यत्वाऽभावादिति चेन्न। काशीं गच्छन् पथि' मृत इत्यादौ काश्याः संयोगरूपफलाश्रयत्वाप्राप्त्या तदर्थमीप्सिततममित्यस्य, अनीप्सितस्य संग्रहार्थं तथा युक्तमित्यस्य चावश्यकत्वेनोक्तलक्षणस्य कर्तुमशक्यत्वात्। तण्डुलं पिपक्षन्मृत इत्यत्र तण्डुलस्य फलसम्बन्धाऽऽश्रयत्वाभावात्कर्मत्वानुपपत्तेश्च। ईप्सिततमित्युक्तौ तु फलसम्बन्धप्रकारेच्छाविषयत्वात्कर्मत्वसिद्धिरिति।

ननु 'कर्त्तुरीप्सिततमं कर्मे'ति लक्षणाभ्युपगमे कर्तृवृत्तिव्यापारप्रयोज्य– फलवत्त्वप्रकारिकेच्छा– निरूपितविषयताश्रयः कर्मेत्यर्थे काशीं न गच्छतीत्यादौ काश्याः संयोगप्रकारकेच्छाविषयत्वाऽभावात्कर्मत्वं न स्यादिति चेन्न। नञ् समभिव्याहारे संयोगाभावानुकूलव्यापारस्यैव गम्धात्वर्थत्वेन संयोगाऽभावरूपफलाश्रयत्वेन कर्म्मत्वोपपत्तेः न चैवमग्नेर्माणवकं वारयतीत्यत्रोत्तरदेशसंयोगानुकूल–व्यापाराऽनुकूल– व्यापारस्य नञ्समभिव्याहारे वारिधात्वर्थत्वाद् दुहियोगे पयस इवाग्नेरपि प्रधानीभूतव्यापारप्रयोज्यसंयोगरूपफलाश्रयत्वापत्तिरिति वाच्यम्। कर्मत्वलक्षणे प्रधानीभूतव्यापारजन्यत्वस्यैव निवेशेनाऽदोषात्। न चैवं गां पयो दोग्धीत्यादौ पयोनिष्ठविभागस्य गोपवृत्तिव्यापाराजन्यत्वात्पयसः कर्मत्वं न स्यादिति वाच्यम्। पयस गोवृत्तिव्यापारजन्यत्वेऽपि गोपवृत्तिव्यापारजन्यत्वस्यापि सत्त्वेन कर्मत्वोपपत्तेः। न चैवं घटं जानाति घटमिच्छतीत्यादौ स्वविषयीभवनाऽनुकूलव्यापारस्य ज्ञानादिरूपस्य धात्वर्थत्वेन ज्ञानादिसमकालोत्पत्तिकस्य स्वविषयीभवनस्य ज्ञानाद्यजन्यत्वात्तदाश्रयस्य घटस्य,

**अनुरूपी लेखक/संयुक्त लेखक**

माणवकनिष्ठस्योत्तरदेशसंयोगानुकूलव्यापाराभावस्य– प्रागभावरूपस्याऽनादित्वात्प्रधानीभूतव्यापाराजन्यत्वेन माणवकस्य च कर्म्मत्वं न स्यादिति वाच्यम्। कर्मत्वलक्षणे प्रयोज्यत्वनिवेशेन तत्र तदुपपत्तेः। तथाहि स्वविषयीभवनादेरप्यनुभवबलेन स्वप्रयोज्यत्वस्याङ्गीकारात् घटस्य, कण्टकापसरणाद्दुःखाभाव इत्याद्यनुरोधेन प्रागभावस्य प्रयोज्यत्वाङ्गीकारेण माणवकस्य च कर्म्मत्वमुपपन्नमिति।

'घटं जानाति' इत्यत्र आवरणभङ्गानुकूलव्यापारः 'ज्ञा' धातोरर्थः फलञ्चात्रावरणभङ्गः तदाश्रयत्वेन घटसय कर्मत्वम् इति। प्राचीनवैयाकरणैः 'ज्ञा' धातोरर्थ आवरणभङ्गानुकूलव्यापारः स्वीक्रियते। नवीनास्तु तद्विपरीतं ज्ञानानुकूलव्यापारं स्वीकुर्वन्ति। मते चास्मिन् ज्ञानमेव फलं तच्च विषयतासम्बन्धेन घटादौ सत्वेन तेषां कर्मत्वं भवति। एतदस्वीकारे 'यथापूर्वं न जानामि' इति वाक्यस्यापत्त्सिाः स्यात्। उक्तञ्च कौण्डभट्टेन– 'अन्यथा यथा पूर्वं न जानामि'[8] इत्यापत्तेरति। अर्थात् विनष्टादिघटे आवरणभङ्गानङ्गीकरणे यथा पूर्व घटसय विद्यमानत्वात्तदानीन्तनधीवृत्तेरावरणभङ्गजनकत्वेऽपि इदानीं घटस्याविद्यमानत्वादिदानीतनधीवृत्तेरावरण– भङ्गजनकत्वासंभवात् 'घटं यथापूर्व जानामि' इति प्रयोगो न स्यात्। अत्र यथापूर्वमिति पदार्थानतिक्रमेऽव्ययीभावः। जानातिक्रियाविशेषणमेतत्। पूर्व पूर्वज्ञानमतिक्रम्येति यथापूर्वम्। पूर्वज्ञानस्यानतिक्रमो यस्मिंस्तथाभूतं ज्ञानं न स्यात्। अयं भावः– घटस्य विद्यमानतादशायां तात्कालिकधीवृत्त्या विद्यमानघटगतं यदावरणयाच्छादनमज्ञानरूपं तदङ्गस्य (आवरण नाशस्य) कृतत्वाद्यथा सुव्यक्तं घटज्ञानं जायते। तद्वद्घटस्याविद्यमानतादशायां तात्कालिकधी – वृत्याऽविद्यमानघटगतावरणभङ्गस्याकृतत्वादावरणस्य सत्त्वात्सुव्यक्तं घटज्ञानं न जायत इति पूर्वज्ञानस्याति– क्रमसत्त्वाद्यथापूर्व जानामीति प्रयोगो न भवेत्। परं तु विद्यमानघटस्य यथा सुव्यक्तं ज्ञानं जायते तथाऽविद्यमानघटस्यापि सुव्यक्तं ज्ञानं जायत इत्यनुभवसिद्धम्। तादृशानुभवोपपत्तयेऽविद्यमानघटेऽपि आवरण– भङ्गोऽस्तीत्यवश्यमङ्गीकार्यम्। सुव्यक्तज्ञानं प्रति आवरणभङ्गस्य कारणत्वादित्यर्थः। अन्यथा विद्यमानघट इवाविद्यमानघटे सुव्यक्तं ज्ञानं न स्यात्।

ननु कर्मलक्षणं 'प्रकृतधातूपात्तव्यापारजन्यफलाश्रयः' कृतम्। परञ्चास्मिन् लक्षणे रामो ग्रामं गच्छतीत्यत्र गमि धात्वर्थः– 'संयोगानुकूलो व्यापारः। स च पादप्रक्षेपरूपा रामे कर्तरि वर्तते। तथा च गम्धातूपात्ताव्यापार– जन्यफलाश्रयत्वात्कर्मत्वापत्तौ चैवश्चैवं गच्छतीति प्रयोग आपद्यते। अर्थात् रामपदार्थस्य कर्तृत्वकर्मत्वैतदुभयलक्षणाक्रान्तत्वेनैकस्यैव रामशब्दस्य प्रथमान्तता द्वितीयान्तता च स्यादिति। तथा प्रयागतो निः सृत्य काशाी गच्छति श्याम इत्यत्र गम्धातूपात्तपादप्रक्षेपरूपव्यापारजन्यफलं यथा संयोगः स च काश्यां वर्तते तथा तादृशव्यापारजन्यत्वाद्विभागोऽपि फलमिति कृत्वा विभागरूपफलाश्रयत्वात्प्रयागस्यापि कर्मत्वापत्तौ प्रयागं गच्छति इति च प्रयोग आपद्यत इति। ग्रामो यथा गम्धात्वर्थव्यापारजन्यसंयोगरूपफलाश्रयस्तथा रामोऽपि कर्ता यद्यपि तादृशसंयोगरूपफलाश्रयो भवति तथापि व्यापाराश्रयत्वेन तज्जन्यफलाश्रयत्वेन च रामस्य कर्तृकर्मसंज्ञयोः प्राप्तौ परत्वात्कर्तृसंज्ञया कर्मसंज्ञाया बाधात् न रामाराममिति प्रयोग आपद्यत इत्यर्थः।

ननु कर्मसंज्ञाया बाधेऽपि क्रियाजन्यफलाश्रयत्वरूपवास्तवं कर्मत्वामादाय द्वितीया दुवरिति चेन्न। कर्मसंज्ञायां सत्यामेव द्वितीयोत्पत्ति न केवलं फलाश्रयत्वादिति। उक्तञ्च कौण्डभट्टेन– 'द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वादि'ति।"[9]

द्वितीयोत्पत्तौ फलाश्रयत्वस्य निमित्तत्वाभावादेव चैत्रः देवदत्तेन तण्डुलं पाचयति' इत्यत्र देवदत्तपदाद्विद्वतीया न भवति यथा चैत्रः यज्ञदत्तं विद्यालयं गमवति' वाक्ये यज्ञदत्तपदाद् भवति। कुत इति चेदुच्यते– संयोगानुकूलो गम्धात्वर्थः, तदुत्तरणिचश्च तादृशव्यापारानुकूलव्यापारोऽर्थः तत्र णिजर्थव्यापाराश्रयत्वेन चैत्रस्य कर्तृसंज्ञा। गम्धातूपात्तव्यापारजन्यफलाश्रयत्वेन विद्यालयस्य, कर्मसंज्ञा। यज्ञदत्तस्य तु णिजर्थव्यापारजन्यफलाश्रयत्वेन कर्मसंज्ञा। तथा च गमयति चैत्रो विद्यालयं यज्ञदत्तम् इति विद्यालयपदादिव यज्ञदत्तपदादपि द्वितीया भवति। अपरस्मिन् वाक्ये विक्लित्यनुकूलव्यापारः पचेरर्थः। तदुत्तरणिचश्च तादृशव्यापाारानुकूलव्यापारोऽर्थः। तत्र णिजर्थव्यापाराश्रयत्वेन चैत्रस्य कर्तृसंज्ञा। पचिधात्वर्थव्यापारजन्य– विक्लित्तिरूपफलाश्रयत्वेन तण्डुलस्य कर्मसंज्ञा। पच्धात्वर्थव्यापाराश्रयस्य देवदत्तस्य तु णिजर्थव्यापारजन्यफलाश्रयत्वेन कर्मसंज्ञाप्राप्तावपि णिजर्थव्यापारजन्यफलाश्रयस्य कर्मसंज्ञा कर्तव्या चेद्भवति तर्हि 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ'[10] इति सूत्रोपात्तधातु–प्रकृतिकणिजर्थ– व्यापारजन्यफलाश्रयस्यैव कर्तव्या नान्यस्येति 'गतिबुद्धी'त्येनेन नियमात् प्रकृते णिजन्तस्य पचिप्रकृतिकत्वेन गत्याद्यर्थधातुप्रकृतिकत्वाभावान्न देवदत्तस्य कर्मसंज्ञा, किन्तु कर्तृसंज्ञैवेति ततस्तृतीया भवति। तथा च पाचयति तण्डुलं देवदत्तेन चैत्र इति प्रयोगः संपद्यते। एवं सति कर्मसंज्ञाया अभावेऽपि वस्तुतः क्रियाजन्यफलाश्रयत्वमादाय यदि द्वितीयोत्पत्तिः स्वीक्रियेत तर्हि 'गमयति विद्यालयं यज्ञदत्तं चैत्रः' वाक्येऽस्मिन् यज्ञदत्तपदादिव पाचयत्यादियोगेऽपि कृष्णपदादद्वितीयापत्तौ पाचयति देवदत्तमित्यनिष्टं प्रसज्येतातो द्वितीयोत्पत्तौ कर्मसंज्ञैव निमित्तं, न तु वस्तुतः क्रियाजन्यफलाश्रयत्वमात्रमित्यवश्यमङ्गीकरणीयमिति भावः।

प्रयागात्काशीं गच्छतीत्यत्र प्रयांग गच्छतीत्यापत्तिरितयाकारिकां द्वितीयामापत्तिं निराकरणार्थं 'क्रिया जन्यफलाश्रयत्वं कर्मत्वं' इति कर्मत्वलक्षणग्रन्थे क्रिया च धात्वर्थ एवेति धात्वर्थक्रियाजन्यफलाश्रयत्वमित्युक्तं भवति। तथा च धात्वर्थत्वस्य क्रियायां विशेषणत्वात्प्रत्यासत्तिन्यायेन फलेऽपि धात्वर्थस्य विशेषणत्वं लभ्यत इति तद्धात्वर्थक्रियाजन्यत्वे सति तद्धात्वर्थफलाश्रयत्वं कर्मत्वमित्येवं कर्मलक्षणं पर्यवसन्नम्। प्रयागात्काशीं गच्छतीत्यत्र पुरोदेशसंयोगानुकूलव्यापारो गम्धात्वर्थ इत्युक्तम्। संयोगरूपफलस्य तदनुकूलव्यापारस्य चेति द्वयोर्धातुवाच्यत्वमिति यावत! तत्र चैत्रनिष्ठपादप्रक्षेपरूपव्यापारजन्यत्वात्संयोगस्येव विभागस्यापि यद्यपि फलत्वं वक्तुं शक्यं तथापि संयोगो यथा गमधातुवाव्यस्तथा विभागः गम्धातुवाच्यो न भवति, किं तु नान्तरीयकतया गमने भावान्न कर्मत्वशङ्कापीति भावः।

अत्र नैयायिकास्त्वाद्य दोषवारणाय कर्मलक्षणं 'परसमवेत क्रियाजन्यफलशालित्वं कुर्वन्ति। 'चैत्रौ गच्छतीत्यत्र चैत्रश्चैत्रं गच्छतीत्येव प्रयोगापत्तिरूपो दोषः अत्र द्वितीयाप्रकृत्यर्थापेक्षया यः परः अन्यश्चैत्रादिः कर्ता तस्मिन्समवायसम्बन्धेन विद्यमानत्वम् इति। एतच्च द्वितीयावाच्यं स्वीकुर्वन्ति यद्यप्यनेन प्रथमदोषाभावेऽपि द्वितीयदोषस्तदवस्थ एव प्रयागात्काशी गच्छतीत्यत्र प्रयागस्य कर्मतापत्तिरूपः। अतः फले विशेषणीभूतं धात्वर्थ तावच्छेदकत्व द्वितीयावाच्यं देयम्। ततश्च परसमवेतक्रियाजन्यधात्वर्थतावच्छेदकफलशालिकर्मेत्येवं लक्षणं पर्यवसन्नं भवति। फले च धात्वर्थतावच्छेदकत्वम्–धातुवाच्यत्वे सति धातुवाच्यनिष्ठविशेष्यता– निरूपितविशेषणतापन्नत्वम्। परसमवेतत्वविशेषणस्य फलजनकसमभिवयाहृत–

ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218
ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-16, No.- II, Issues-28, YEAR- April-June-2023

धात्वर्थक्रियायामयन्वयः। द्वितीयाप्रकृतिभूतग्रामाद्यर्थापेक्षयायः परश्चैत्रादि, तस्मिन्समवाय–सम्बन्धेन विद्यमाना या धात्वर्थ क्रियाव्यापारस्तज्जन्यफलशालि कर्मेत्यर्थात् गम्धात्वर्थफलरूपसंयोगस्य ग्राम–चैत्रैतदुभयनिष्ठत्वाविशेषेऽपि ग्रामसंयोगस्य द्वितीयाप्रकृत्यर्थग्रामापेक्षया परो यश्चैत्रस्तन्निष्ठव्यापारजन्यत्वेन परसमवेतक्रियाजन्यफलशालितया ग्रामस्य कर्मतया द्वितीया भवति। चैत्रसंयोगस्य चैत्रमिति द्वितीयाप्रकृत्यर्थचैत्रापेक्षया कर्तुश्चैत्रस्य परत्वाभावेन परसमवेतक्रियाजन्यफलशालित्वाभावात् (स्वसमवेतक्रियाजन्यफलशालित्वात्) न चैत्रस्य कर्मसंज्ञेति द्वितीयाऽप्राप्तेर्न चैत्रश्चैत्रमिति प्रयोगापत्तिरिति भावः। तथा च प्रयोगस्यापि नानेन कर्मत्वं यतोहि प्रयागस्य गम्धात्वर्थव्यापारे विशेषणीभूतसंयोगरूपफलाश्रयत्वाभावात्। तथा च प्रयागे विभागस्याश्रयत्वन्तु विद्यते परन्तु विभागो न धात्वर्थतावच्छेदकोऽतः न तस्य कर्मत्वम्।

परत्वञ्चात्र प्रत्यासत्त्या द्वितीयाप्र.त्यर्थ ग्रामाद्यपेक्षया एव गृह्यते। यथा देवदत्तस्तण्डुलं पचतीत्यादौ द्वितीयाप्रकृत्यर्थतण्डुलाद्यपेक्षयाऽन्यो यद्देवदत्तादि कर्ता तस्मिन् समवायसम्बन्धेन विद्यमानो यो व्यापारस्तज्जन्यं, धातु–वाच्यत्वसमानाधिकरणविशेषणताविशिष्टं च यत्फलं विक्लित्तिरूपं तदाश्रयत्वात्तण्डुलस्य कर्मसंज्ञा भवति। चैत्रश्चैत्रमित्यत्र तु द्विष्तीयाप्रकृत्यर्थचैत्रनिष्ठसंयोगानुकूलव्यापारस्य चैत्रान्यनिष्ठत्वाभावान्न तादृशः प्रयोगः। नैयायिकैः प्रथमान्त मुख्यविशेष्यकः शाब्दबोधः, फलानुकूलो व्यापारो धात्वर्थः, लकारार्थश्च कृतिरिति स्वीक्रियते। शाब्दबोध श्चेत्थम्–तण्डुल निष्ठा, धातुवाच्या च या विक्लित्तिस्तादृशविक्लित्यनुकूलस्तण्डुलान्यदेवदत्तनिष्ठो यो व्यापारस्तादृश व्यापारानुकूला या कृतिस्तादृश. तिमान्देवदत्त इति। उक्तञ्च कौण्डभट्टेन[11]– 'तथा च चैत्रस्तण्डुलं पचतीत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्ति–शालित्वात्तण्डुलानां कर्मते'ति। एतन्नैयायिकमतं गौरवग्रस्तत्वादति–प्रसङ्गाच्च त्याज्यमिति। तथाहि–सूत्राक्षरासंस्पृष्टस्यात एव स्वकपोलकल्पितस्य परसमवेतत्वस्य द्वितीयावाच्यत्वकल्पने गौरवादेः स्पष्टत्वान्न तस्य द्वितीयावाच्यत्वकल्पनं युक्तमिति भावः। यद्यपि परसमवेतत्वस्य द्वितीयावाच्यत्वकल्पने चैत्रश्चैत्रमिति प्रयोगापत्तिर्नास्ति तथापि गमयति कृष्णं गोकुलमितिवत्! पाचयति कृष्णेन गोप इत्यस्य स्थाने पाचयति कृष्णं गोप इत्यापत्तिरिति। तथाहि– अत्र प्रयोज्यः कृष्णः, प्रयोजको गोपः। तथा च द्वितीयाप्रकृत्यर्थकृष्णापेक्षया परो यो गोपस्तत्समवेतव्यापारजन्यं, णिजन्तधातुवाच्यं सत् णिजर्थव्यापारविशेषणात्मकं यत्फलं विक्लित्त्यनुकूलव्यापाररूपं, तादृशफलशालित्वरूपकर्मत्वस्य प्रयोज्ये कृष्णे सत्त्वात्कृष्णपदाद्द्वितीयापत्तिस्यादतः द्वितीयाप्रवृत्तौ कर्मसंज्ञैव निमित्तं, न तूक्तफलशालित्वमित्यङ्गीकरणीयम्। यदि तु पाचयत्यादियोगे 'गतिबुद्धी'ति नियमादुक्तफलशालिनः कर्मसंज्ञा न भवतीत्युच्यते तर्हि तत एव द्वितीयापत्तिवारणसंभवेऽलं परसमवेतत्वस्य द्वितीयावाच्यत्वकल्पनयेति भावः। उक्तञ्च कौण्डभट्टेन– 'गमयति कृष्णं गोकुलमितिवत्पाचयति कृष्णं गोपइत्यापत्तेः'[12] इति ननु परसमवेतव्यापारजन्यधा त्वर्थावच्छेदकफलशालित्वरूपमेव कर्मत्वं द्वितीया प्रवृत्तौ निमित्तं न तु कर्मसंज्ञा। पाचयति कृष्णेन गोप इत्यत्र द्वितीयाप्रकृत्यर्थकृष्णान्य–गोपसमवेतव्यापारजन्यधात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वस्य प्रयोज्ये कृष्णे सत्त्वेऽपि गतिबुद्धीति सूत्रेणै तत्सूत्रोपात्तगतिबुद्ध्यादिधातुप्रकृतिक एव णिजन्ते परसमवेतेत्याद्युक्तकर्मत्वस्य विवक्षा कर्तव्या, न गत्याद्यतिरिक्तधातुप्रकृतिकणिजन्ते पाचयत्यादाविति बोधनान्न पाचयति कृष्णं गोप इति द्वितीयापत्तिरिति चेन्न, कर्मकर्तरि 'तण्डुलः पच्यते स्वयमेव' इत्यादि स्थले कर्मकर्त्तुः द्वितीयापत्तेः। वाक्येऽस्मिन् कर्मकर्त्तुस्तण्डुलस्य, द्वितीयाप्रकृत्यर्थतण्डुलापेक्षया परो योऽग्निस्तत्समवेतसंयोगरूपव्यापारजन्यधात्वर्थतावच्छेदकविकिलत्तिरूप– फलशालित्वाद् कर्मतया ततो द्वितीयोत्पत्तौ तण्डुलं पच्यते स्वयमेवेति प्रयोगापत्तिः स्यादिति भावः। उक्तञ्च कौण्डभट्टेन[13]– 'तण्डुलं पचति चैत्र इतिवत्तण्डुलं पच्यते स्वयमेवेत्यापत्तेः तस्माद् द्वितीयाविभक्तयुत्पत्तौ कर्मसंज्ञैव निमित्तं न तु परसमवेतेत्याद्युक्तरूपं फलशालित्वमिति। विभक्तयुत्पत्तौ कर्मादिसंज्ञाया निमित्तत्वे स्वीकृते 'तण्डुलः पच्यते सवयमेवे'त्यत्र कर्मकर्तुस्तण्डुलस्य कर्मसंज्ञायाः प्राप्तावपि परया कर्तृसंज्ञया तद्बाधात्र द्वितीयापत्तिः, किंतु प्रथमैवेति न कश्चिदोष इत्याशयः।

**कर्मभेदाः**– धात्वर्थव्यापारजन्यफलाश्रयरूपं कर्म सप्तप्रकारकमस्ति। ईप्सिततमत्वेन त्रयाणां ग्रहणं भवति तानि च निर्वर्त्यविकार्यप्राप्ययपाणि। भर्तृहरिणापि ईप्सिततमकर्मणस्त्रैविध्यमङ्गीकृतम्। तथा चोक्तम्–

**"निर्वर्त्यं विकार्यञ्च प्राप्यं चेति त्रिधामतम्।**
**तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम्।।"[14]**

ईप्सितकर्मणस्त्रिविधेषु भेदेषु निर्वर्त्यविकार्ययोरुल्लेखः भाष्यवार्तिकेऽपि दृश्यते। तथाहि[15]– 'कर्मणि निर्वर्त्यमान विक्रियमाणे। तत्र निर्वर्त्यकर्मणः लक्षणं कुर्वता कैयटेनोक्तम्[16]– 'यस्योपादानकारणं पादानकारणं नास्ति तन्निर्वर्त्य, यथा संयोगे करोति। यस्यापि सदप्युपादानकारणं न विवक्ष्यते तन्निर्वर्त्य यथा–घटं करोतीति। लक्षणमिदमसतः सज्जायते इति वैशेषिकसिद्धान्तानुसारेण, सतः सज्जायते इति सत्कार्यवादसिद्धान्तानुसारेण कृतम्। उभयपक्षे एव यत्कर्म जन्मनाव्यक्तं भवति तन्निर्वर्त्यमित्याभिप्राय उक्तञ्च भर्तृहरिणा–

**"सदसज्जायते सद्वा, जन्मना यत्प्रकाशते।**
**तन्निर्वर्त्यं विकार्य च कर्म द्वेधा व्यवस्थितम।।**
**प्रकृत्युच्छेदसम्भूतं किञ्चिद् काष्ठादि भस्मवत्।**
**किञ्चिगुणान्तरोत्पत्त्या सुवर्णादि विकारवत्।।**
**क्रियागत विशेषाणां सिद्धिर्यत्र न गम्यते।**
**दर्शनानुमानाद्वा तत्प्राप्यमिति कथ्यते।।"[17]**

अनीप्सितकर्मणश्चचातुर्विध्यमस्ति। तथाहि– ईप्सितत्वाभावे सति द्वैष्यत्वाभावे च सति यत्प्राप्यं क्रियाजन्यफलाश्रयः, तदेकम्। द्वेष्यं द्वितीयम् अपादानादिसंज्ञादिभिरविवक्षितम्, अर्थात्– अकथितं चेति सूत्रविहितं कर्म तृतीयम्। चतुर्थञ्च[18] 'क्रूरमभिक्रुध्यती'त्यत्र[19] 'क्रुध द्रुहेर्ष्ये'ति सम्प्रदानसंज्ञा प्राप्ता। 'क्रुधद्रुहोरुपसृष्टयो'रिति विहितकर्मसंज्ञकरूपम्। अभिहितञ्च भर्तृहरिणापि–

**औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।**

ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-16, No.- II, Issues-28, YEAR- April-June-2023

**संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।** [20]

## संदर्भ ग्रन्थ सूची

1. पा0सू0 1/4/104.
2. पा0सू0 2/3/2.
3. पा0सू0 1/4/49.
4. व्यपदेशिवदेकस्मिन् इति परिभाषास्वरूपम्।
5. प्रौढमनोरमा पृ0 774.
1. पा0सू0 1/4/49.
2. पा0सू0 1/4/50.
3. वै0भू0सा0 सुवर्थप्रकरणम्– 172 पृ0।
1. वैयाकरणभृ0सा0 पृ0 152.
2. अष्टा0 पा0सू0।
1. वैयाकरणभू0सा0सु0नि0, पृ0सं0–178.
2. वै0भू0सा0सु0नि0पृ0–180.
1. वै0भू0सा0सु0नि0पृ0–180.
2. वाक्यपदीयम् 3/45–सा0समु0।
3. महाभाष्यवार्तिकम् –3/2/1.
4. महाभाष्य प्रदीप 3/2/1.
5. वाक्यपदीयम् 3/49–51, सा0समु0.
6. सि0कौ0 कारकप्रकरणम् पृ0–648.
7. पा0सू0 1/4/37.
8. वा0प0सा0समु0का0 46.

*****